श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

# ॥ इन्द्रनीलपद्धतिः विंशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

# ॥ इन्द्रनीलपद्धतिः विंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

हरिणा हरिनीलैश्च प्रतियत्नवतीं सदा ।
अयत्नलभ्यनिर्वाणाम् आश्रये मणिपादुकाम् ॥ **20.1** ॥

हरिरत्नमरीचयस्तवैते
नवनीलीरसनिर्विशेषवर्णाः ।
श्रुतिमूर्धनि शौरिपादरक्षे !
पलितानुद्भवभेषजं भवन्ति ॥ **20.2** ॥

अळकैरिव बिम्बितैः श्रुतीनां
हरिनीलैः सृजसि त्वमुन्मयूखैः ।
कमलादयितस्य पादरक्षे !
करुणोदन्वति शैवलप्ररोहान् ॥ **20.3** ॥

अनर्घैर्हरिनीलपद्धतीनां
प्रथमानैर्मणिपादुके ! मयूखैः ।
अधरीकुरुषे रथाङ्गपाणेः
अमितामूर्ध्वमवस्थितस्य कान्तिम् ॥ **20.4** ॥

चरणावनि ! भाति सह्यकन्या
हरिनीलद्युतिभिस्तवानुविद्धा ।

वसुदेवसुतस्य रङ्गवृत्तेः
    यमुनेव स्वयमागता समीपम् ॥ **20.5** ॥

अवधीरितदेवतान्तराणाम्
    अनघैस्त्वं मणिपादुके ! मयूखैः।
हरिनीलसमुद्भवैर्विधत्से
    हरिसारूप्यमयत्नतो जनानाम् ॥ **20.6** ॥

नेत्रेषु पुंसां तव पादरक्षे !
    नीलाश्मभासा निहिताञ्जनेषु।
श्रिया समं संश्रितरङ्गकोशो
    निधिः स्वयं व्यक्तिमुपैति नित्यम् ॥ **20.7** ॥

अभङ्गुरामच्युतपादरक्षे !
    मान्यां महानीलरुचिं त्वदीयाम्।
निःश्रेयसद्वारकवाटिकायाः
    शङ्के समुत्पाटनकुञ्चिकां नः ॥ **20.8** ॥

जीवयत्यमृतवर्षिणी प्रजाः
    तावकी दनुजवैरिपादुके !।
घोरसंसरणघर्मनाशिनी
    काळिकेव हरिनीलपद्धतिः ॥ **20.9** ॥

शतमखोपलभङ्गमनोहरा
    विहरसे मुरमर्दनपादुके !।
मणिकिरीटगणेषु दिवौकसां
    मधुकरीव मनोरमपङ्क्तिषु ॥ **20.10** ॥

अन्विच्छतां किमपि तत्त्वमनन्यदृश्यं
    सम्यक्प्रकाशजननी धृतकृष्णरूपा।

पादावनि ! स्फुरसि वासवरत्नरम्या
    मध्ये समाधिनयनस्य कनीनिकेव ॥ **20.11** ॥

मातः ! सलीलमधिगम्य विहारवेलां
    कान्तिं समुद्वहसि काञ्चनपादुके ! त्वम्।
लक्ष्मीकटाक्षरुचिरैर्हरिनीलरत्नैः
    लावण्यसिन्धुपृषतैरिव रङ्गधाम्नः ॥ **20.12** ॥

क्लृप्तावकुण्ठनविधिर्मणिपादरक्षे !
    नीलांशुकैर्वलभिदश्मसमुद्भवैस्ते।
सङ्गच्छते मुनिजनस्य मतिः समाधौ
    रात्रौ समस्तजगतां रमणेन लक्ष्म्याः ॥ **20.13** ॥

द्रष्टुं कदाचन पदावनि ! नैव जन्तुः
    शक्नोति शाश्वतनिधिं निहितं गुहायाम्।
कृष्णानुरूपहरिनीलविशेषदृश्या
    सिद्धाञ्जनं त्वमसि यस्य न देवि ! दृष्टेः ॥ **20.14** ॥

प्रत्येमि रङ्गनृपतेर्मणिपादुके ! त्वां
    कृष्णान्तरङ्गरुचिभिर्हरिनीलरत्नैः।
विश्वापराधसहनाय पदं तदीयं
    विश्वम्भरां भगवतीं समये भजन्तीम् ॥ **20.15** ॥

मत्वा मषीं परिमितां भवती तदन्यां
    वैकुण्ठपादरसिके मणिपादुके ! स्वान्।
अङ्क्ते स्वयं किरणलेपिभिरिन्द्रनीलैः
    आशातटेषु लळितानपदानवर्णान् ॥ **20.16** ॥

वलमथनमणीनां धामभिस्तावकानां
    मधुरिपुपदरक्षे ! वासरैरव्यपेता।

अभिसरणपराणां वल्लवीनां तदाऽऽसीत्
    शमितगुरुभयार्तिः शर्वरी काचिदन्या ॥ **20.17** ॥

शतमखमणिभङ्गैरुन्मयूखैर्दिशन्ती
    शरणमुपगतानां रङ्गनाथेन साम्यम्।
प्रथयसि जगति त्वं पादुके ! हैतुकानाम्
    उपनिषदुपगीतां तत्क्रतुन्यायवार्ताम् ॥ **20.18** ॥

परिचरति विधौ त्वां पादुके ! रङ्गभर्तुः
    पदसरसिजभृङ्गैर्भासुरैरिन्द्रनीलैः।
प्रकटितयमुनौघा भक्तिनम्रस्य शम्भोः
    परिणमयसि चूडाविष्णुपद्याः प्रयागम् ॥ **20.19** ॥

पदकिसलयसङ्गात् पादुके ! पत्रळश्रीः
    नखमणिभिरुदारैर्नित्यनिष्पन्नपुष्पा।
शतमखमणिनीला शौरिलावण्यसिन्धोः
    निबिडतमतमाला काऽपि वेलावनी त्वम् ॥ **20.20** ॥

त्वयि विनिहितमेतत् केऽपि पश्यन्ति मन्दाः
    शतमखमणिजालं शार्ङ्गिणः पादरक्षे !।
वयमिदमिह विद्मः प्राणिनां भावुकानां
    हृदयगृहगुहाभ्यः पीतमन्धं तमिस्रम् ॥ **20.21** ॥

कृतश्यामा मणिभिरसितैः कृष्णपक्षेण जुष्टा
    श्रेयः पुंसां जनयसि गतिं दक्षिणामुद्वहन्ती।
तेनास्माकं प्रथयसि परं पादुके ! तत्त्वविद्भिः
    मौळौ दृष्टां निगमवचसां मुक्तिकालाव्यवस्थाम् ॥ **20.22** ॥

सद्भिर्जुष्टा समुदितविधुर्जैत्रयात्राविनोदे -
    ष्वातन्वाना रजनिमनघामिन्द्रनीलांशुजालैः।

चित्रं ख्याता कुमुदवनतः पादुके ! पुष्यसि त्वं
व्याकोचत्वं विबुधवनितावक्त्रपङ्केरुहाणाम् ॥ **20.23** ॥

नित्यं लक्ष्मीनयनरुचिरैः शोभिता शक्रनीलैः
सालग्रामक्षितिरिव शुभैः शार्ङ्गिणो रूपभेदैः।
साकेतादेः समधिकगुणां सम्पदं दर्शयन्ती
मुक्तिक्षेत्रं मुनिभिरखिलैर्गीयसे पादुके ! त्वम् ॥ **20.24** ॥

पादन्यासप्रियसहचरीं पादुके ! वासगेहात्
त्वामारुह्य त्रिचतुरपदं निर्गते रङ्गनाथे।
अन्तः स्निग्धैरसुरमहिळावेणिविक्षेपमित्रैः
श्यामच्छायं भवति भवनं शक्रनीलांशुभिस्ते ॥ **20.25** ॥

या ते बाह्याङ्गणमभियतः पादुके ! रङ्गभर्तुः
सञ्चारेषु स्फुरति विततिः शक्रनीलप्रभायाः।
विष्वक्सेनप्रभृतिभिरसौ गृह्यते वेत्रहस्तैः
भ्रूविक्षेपस्तव दिविषदां नूनमाह्वानहेतुः ॥ **20.26** ॥

अक्ष्णोरञ्जनकल्पना यवनिका लास्यप्रसूतेर्गतेः
चिद्गङ्गायमुना मुकुन्दजलधेर्वेलातमालाटवी।
कान्ताकुन्तळसन्ततिः श्रुतिवधूकस्तूरिकालङ्क्रिया
नित्यं रत्नपदावनि ! स्फुरति ते नीला मणिश्रेणिका ॥ **20.27** ॥

निरन्तरपुरन्दरोपलभुवं द्युतिं तावकीम्
अवैमि मणिपादुके ! सरणिसङ्गिनीं रङ्गिणः।
तदीयनवयौवनद्विरदमल्लगण्डस्थली
गळन्मदझलञ्झलाबहुळकज्जळश्यामिकाम् ॥ **20.28** ॥

प्रतीमस्त्वां पादावनि ! भगवतो रङ्गवसतेः
घनीभूतामित्थं पदकमलमाध्वीपरिणतिम्।

स्फुरन्तः पर्यन्ते मदगरिमनिष्पन्दमधुप -
प्रसक्तिं यत्रैते विदधति महानीलमणयः ॥ **20.29** ॥

नमतां निजेन्द्रनीलप्रभवेन मुकुन्दपादुके ! भवती।
तमसा निरस्यति तमः कण्टकमिव कण्टकेनैव ॥ **20.30** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे इन्द्रनीलपद्धतिः विंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥